**कृष्णयजुर्वेदीय तैत्तिरीयोपनिषत्**

अथ शिक्षावल्यां एकादश अनुवाकः

# ।। दीक्षान्तोपदेशः ।।

## ।। दीक्षान्तोपदेशस्य शाङ्करभाष्यम् ।।

सम्पादकः - डा. कोरमंगलं कृष्णकुमारः
Ph: 9447256982



### ।। दीक्षान्तोपदेशः ।।

वेदमनूच्याचार्योऽन्तेवासिनमेवमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यं धर्मान्न प्रमदितव्यं कुशलान्न प्रमदितव्यं भूत्यै न प्रमदितव्यं स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं देवपितृकार्याभ्यां न प्रमदितव्यम्।।१।। मातृदेवो भव पितृदेवो भव आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।।२।। ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयमश्रद्धयाऽदेयं श्रिया देयं ह्रिया देयं भिया देयम्।।३।। अथ ते यदि कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः। एष आदेशः एष उपदेशः एषा वेदोपनिषत् एवमुपासितव्यम्।एवमु चैतदुपास्यम्।।४।।

————म————

### ।। शाङ्करभाष्यम्।।

वेदमनूच्याध्याप्याचार्योऽन्तेवासिनं शिष्यमनुशास्ति ग्रन्थग्रहणादनु पश्चाच्छास्ति तदर्थं ग्राहयतीत्यर्थः, अतोऽवगम्यतेऽधीत वेदस्य धर्मजिज्ञासामकृत्वा गुरुकुलान्न समावर्तितव्यमिति। *बुद्ध्वा कर्माणि चारभेत्* इति स्मृतेश्च। कथमनुशास्तीत्याह- सत्यं वद यथाप्रमाणावगतं वक्तव्यं तद्वद। तद्धर्मं चर। धर्म इत्यनुष्ठेयानां सामान्यवचनम् सत्यादि विशेषनिर्देशात्। स्वाध्यायाद ध्ययनान्मा प्रमदः प्रमादं मा कार्षीः। आचार्याय आचार्यार्थं प्रियमिष्टं धनमाहृत्यानीय दत्वा। विद्यानिष्क्रियार्थं आचार्योण चानुज्ञातोऽनुरूपान्दारानाहृत्य प्रजातन्तुं प्रजा सन्तानं मा व्यवच्छेत्सीः। प्रजासन्तते र्विच्छित्तिर्न कर्तव्या। अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादि कर्मणा कर्तव्य इत्यभिप्रायः। प्रजाप्रजनप्रजातित्रयनिर्देशसामर्थ्यात्। अन्यथा प्रजनश्चेत्येतदेकमेवावक्ष्यत्। सत्यान्न प्रमदितव्यं प्रमादो न कर्तव्यः। सत्याच्च प्रमदनमनृतप्रसङ्गः प्रमादशब्दसामर्थ्यात्। विस्मृत्याप्यनृतं न वक्तव्यमित्यर्थः। अन्यथासत्य वदनप्रतिषेध एव स्यात्। धर्मान्न प्रमदितव्यम्। धर्मशब्दस्यानुष्ठेयविषयत्वादनुष्ठानं प्रमदः स न कर्तव्यः। अनुष्ठातव्य एव धर्म इति यावत्। एवं कुशलादात्मरक्षार्थकर्मणो न प्रमदितव्यम्। भूतिर्विभूतिस्तस्यै भूत्यै भूत्यर्थान्मङ्गलयुक्तात्कर्मणो न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। स्वाध्यायोऽध्ययनं प्रवचनमध्यापनं ताभ्यां न प्रमदितव्यम्। ते हि नियमेन कर्तव्येत्यर्थः। तथा देवपितृकार्याभ्यां न प्रमदितव्यम्। दैवपित्र्ये कर्मणी कर्तव्ये। मातृदेवो माता देवो यस्य सः। त्वं मातृदेवो भव स्याः। एवं पितृदेव आचार्य देवो भव। देवतावदुपास्या एत इत्यर्थः। यान्यपि चान्यान्यनवद्यान्यनिन्दितानि शिष्टाचारलक्षणानि कर्माणि तानि सेवितव्यानि कर्तव्यानि त्वया। नो न कर्तव्यानीतराणि सावद्यानि शिष्टकृतान्यपि। यान्यस्मकमाचार्याणां सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि तान्येव त्वयोपास्यानि अदृष्टार्थान्यनुष्ठेयानि नियमेन कर्तव्यानीति यावत्। नो इतराणि विपरीतान्याचार्य कृतान्यपि। वृत्ते वा आयुक्ता अपर प्रयुक्ताः। अलूक्षा अरूक्षा अक्रूरमतयः। धर्मकामा अदृष्टार्थिनोऽवा महता इत्येतत्, स्युर्भवेयुः। ते यथा येन प्रकारेण ब्राह्मणास्तत्र तस्मिन् कर्मणि वृत्ते वा वर्तेरंस्तथा त्वमपि वर्तेथाः। अथाभ्याख्यातेषु अभ्याख्याता अभ्युक्ता दोषेण संदिह्यमानेन संयोजिताः केनचित्तेषु च यथोक्तं सर्वमुपनयेद्ये तत्रेत्यादि। एष आदेशो विधिः। एष उपदेशः पुत्रादिभ्यः पित्रादीनाम्। एषा वेदोपनिषद्वेदरहस्यं वेदार्थ इत्येतत्। एतदेवानुशासनमीश्वरवचनम्। आदेश वाक्यस्य विधेरुक्तत्वात्सर्वेषां वा प्रमाणभूतानामनुशासनमेतत्। यस्मादेवं तस्मादेवं यथोक्तं सर्वमुपासितव्यं कर्तव्यम्। एवमुचैतदुपास्यमेव चैतन्नानुपास्यमित्यादरार्थं पुनर्वचनम्।।

...............